CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 205

Title Dhātupātha

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 209 Subject: Grammar

Title: Dhātupāṭha

Author: — Scribe: Rāmakṛṣṇa

Date of the work: — Date of the Ms.: V.S. 1741

Place of the work: — Place of the Ms.: Kāśī

Size: 10.8" by 4.6" Extent: 14 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: Complete

श्रीगणाधिपतये नमः ॥ भू सत्तायां । उदात्तः परस्मैभाषः ॥ १ ॥ एध वृद्धौ । स्पर्द्ध संघर्षे । गाध प्रतिष्ठालिप्सयोर्ग्र
न्थे च । बाध लोडने । नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु । दध धारणे । स्कुदि आप्रवणे । श्विदि श्वैत्ये ॥
वदि अभिवादनस्तुत्योः । भदि कल्याणे सुखे च । मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु । स्पदि किंचिच्चल
ने । क्लिदि परिदेवने । मुद हर्षे । दद दाने । ष्वद स्वर्द आस्वादने । उर्द माने क्रीडायां च । कुर्द खुर्द गुर्द गुद क्री
डायामेव । षूद क्षरणे । ह्राद अव्यक्ते शब्दे । ह्लादी सुखे च । स्वाद आस्वादने । पर्द कुत्सिते शब्दे । यती प्र
यत्ने । युतृ जुतृ भासने । विथृ वेथृ याचने । श्रथि शैथिल्ये । ग्रथि कौटिल्ये । कत्थ श्लाघायां ॥ ३८ ॥ एधादय उ
दात्ता अनुदात्तेत आत्मनेभाषाः । अत सातत्यगमने । चिती संज्ञाने । च्युतिर् आसेचने । श्च्युतिर् क्षरणे ॥ च६
मन्थ विलोडने । कुथि पुथि लुथि मथि हिंसासंक्लेशनयोः । षिध गत्यां । षिधू शास्त्रे माङ्गल्ये च ।
खादृ भक्षणे । खद स्थैर्ये हिंसायां च । बद स्थैर्ये । गद व्यक्तायां वाचि । रद विलेखने । णद अव्यक्ते शब्दे । अ
र्द गतौ याचने च । नर्द गर्द शब्दे । तर्द हिंसायां । कुर्द कूजिते शब्दे । खर्द दंदशूके । अति अदि बन्धने ।
इदि परमैश्वर्ये । बिदि अवयवे । गडि वदनैकदेशे । णिदि कुत्सायां । टुनदि समृद्धौ । चदि आह्लादने दी
प्तौ च । त्रदि चेष्टायां । कदि क्रदि क्लदि आह्वाने रोदने च । क्लिदि परिदेवने । शुन्ध शुद्धौ ॥ ३८ ॥ अताद १

य उदात्ता उदात्तेतः परस्मैभाषाः । शीकृ सेचने । लोकृ दर्शने । श्लोकृ संघाते । द्रेकृ ध्रेकृ शब्दोत्साहयोः । रेकृ शङ्कायां ।
सेकृ स्रेकृ स्रकि श्रकि श्लकि गत्यर्थाः । शकि शङ्कायां । अकि लक्षणे । वकि कौटिल्ये । मकि मण्डने । कक लौल्ये ।
कुक वृक आदाने । चक तृप्तौ प्रतिघाते च । ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ तिकृ ती
कृ रघि लघि गत्यर्थाः । लघि भोजननिवृत्तौ च । अघि वघि मघि गत्याक्षेपे । मघि कैतवे च । राघृ लाघृ द्राघृ ध्रा
घृ सामर्थ्ये । द्राघृ आयामे च । श्लाघृ कत्थने । शीकादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ ४२ ॥ फक्क नीचै
र्गतौ । तक हसने । तकि कृच्छ्रजीवने । बुक्क भाषणे । कख हसने । ओखृ राखृ लाखृ द्राखृ ध्राखृ शोषणा
लमर्थयोः । शाखृ श्लाखृ व्याप्तौ । उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख
इखि ईखि वल्ग रगि लगि अगि वगि मगि स्वगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः । युगि जुगि
बुगि वर्जने । घघ हसने । मघि मण्डने । शिघि आघ्राणे । फक्कादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ ४८ ॥ वर्च
दीप्तौ । षच सेचने सेवने च । लोचृ दर्शने । शच व्यक्तायां वाचि । श्वच श्वचि गतौ । कच बन्धने । कचि काचि दी
प्तिबन्धनयोः । मच मुचि कल्कने । मचि धारणोच्छ्रायपूजनेषु । पचि व्यक्तीकरणे । ष्टुच प्रसादे । ऋज ग
तिस्थानार्जनोपार्जनेषु । ऋजि भृजी भर्जने । एजृ भ्रेजृ भ्राजृ दीप्तौ । ईज गतिकुत्सनयोः ॥ वर्चादय उदात्ता

अनुदात्तेत आत्मनेभाषाः ॥२०॥ शुच शोके । कुच शब्दे तारे । कुंच क्रुंच कौटिल्याल्पीभावयोः । लुंच अपनयने ।
२श्रं अंचु गतिपूजनयोः । वंचु चंचु तंचु त्वंचु म्रुंचु म्लुंचु म्रुचु म्लुचु गत्यर्थाः । ग्रुचु ग्लुचु कुजु खुजु स्ते
यकरणे । ग्लुंचु षस्ज गतौ । गुजि अव्यक्ते शब्दे । अर्च पूजायां । म्लेछ अव्यक्ते शब्दे । लछ लाछि लक्षणे । वाछि
इच्छायां । आछि आयामे । ह्रीछ लज्जायां । हुर्छा कौटिल्ये । मुर्छा मोहसमुच्छ्राययोः । स्फुर्छा विस्तृतौ ॥
युछ प्रमादे । उछि उंछे । उछी विवासे । ध्रज ध्रजि ध्वज ध्वजि गतौ । कूज अव्यक्ते शब्दे । अर्ज
षर्ज अर्जने । गर्ज शब्दे । तर्ज निर्भर्त्सने । कर्ज व्यथने । खर्ज पूजने च । अज गतिक्षेपणयोः । तेज पालने । खज
मंथे । खजि गतिवैकल्ये । एजृ कंपने । टुओस्फूर्जा वज्रनिर्घोषे । क्षि क्षये । क्षीज
अव्यक्ते शब्दे । लज लजि भर्जने । लाज लाजि भर्त्सने च । जज जजि युद्धे । तुज हिंसायां । तुजि पालने ।
गज गजि गृज गृजि मुज मुजि शब्दार्थाः । गज मदने च । वज व्रज गतौ । शुचाद्य उदात्ता उदात्तेतः । क्षि
वर्जं परस्मैभाषाः । अट्ट अतिक्रमणहिंसयोः । वेष्ट वेष्टने । चेष्ट चेष्टायां । गोष्ट लोष्ट संघाते । घट्ट
चलने । स्फुट विकसने । अठि गतौ । वठि एकचर्यायां । मठि कठि शोके । मुठि पालने । हेठ विबाधायां ।
एठ च । हिडि गत्यनादरयोः । हुडि संघाते । कुडि दाहे । वडि विभाजने । मडि च । भडि परिभाषणे ॥ २

पिडि संघाते । मुडि मार्जने । तुडि तोडने । हुडि वरणे । चडि कोपे । शडि रुजायां संघाते च । तडि ताडने । पडि ग
तौ । कडि मदे । खडि मंथे । हेडृ होडृ अनादरे । बाडृ आप्लाव्ये । द्राडृ ध्राडृ विशरणे । शाडृ श्लाघायां । शौ
ट्राद्य उदात्ता अनुदात्तेत आत्मनेभाषाः । शौटृ गर्वे । यौटृ बंधने । म्लेटृ म्रेडृ उन्मादे । कट वर्षावि
रणयोः । चट इत्येके । अट पट गतौ । रट परिभाषणे । लट बाल्ये । शट रुजाविशरणगत्यवसादनेषु । वट
वेष्टने । किट खिट त्रासे । शिट षिट अनादरे । जट झट संघाते । भट भृतौ । तट उच्छ्राये । खट कांक्षा
यां । णट नृत्तौ । पिट शब्दसंघातयोः । हट दीप्तौ । षट अवयवे । लुट विलोडने । चिट परप्रेष्ये । विट
शब्दे । बिट आक्रोशे । हिट इत्येके । इट किट कटी गतौ । मडि भूषायां । कुडि वैकल्ये । मुट मर्दने । चुडि अल्पी
भावे । चुट इत्येके । मुडि खंडने । पुडि चेत्येके । पठ व्यक्तायां वाचि । वठ स्थौल्ये । मठ मदनिवासयोः । कु
ठ इत्येके । कठ कृच्छ्रजीवने । रठ परिभाषणे । हठ प्लुतिशठत्वयोः । बलात्कार इत्येके । रुठ लुठ उठ उपघाते । ऊठ इ
त्येके । पिठ हिंसासंक्लेशनयोः । शठ कैतवे च । शुठ प्रतीघाते । शुठि इत्येके । कुठि च । लुठि आलस्ये प्र
तिघाते च । शुठि शोषणे । रुठि लुठि गतौ । चुडृ भावकरणे । अडु अभियोगे । कडु कार्कश्ये । क्रीडृ विहा
रे । तुडृ तोडने । तूडृ इत्येके । हूडृ हूडृ होडृ गतौ । रोडृ अनादरे । रौडृ लौडृ उन्मादे । अड उद्यमे । लड
रुटि लुटि स्तेये । रुठि लुठि इत्येके । स्फुडि इत्यपरे । स्फुटिर् विशरणे । स्फुटि इत्येके । ५

विलासे।कडमदे।कुड्डिर्लेके।गडि वदनैकदेशे।शौटाद्यउदात्ता अनुदात्तेतः परस्मैभाषाः।तिपृ तेपृ ष्टिपृ
२ ष्टेपृ क्षरणार्थाः।तेपृ कंपने च।ग्लेपृ दैन्ये।टुवेपृ कंपने।केपृ गेपृ ग्लेपृ च।मेपृ रेपृ लेपृ गतौ।त्रपूष् लज्जा
यां।कपि चलने।रबि लबि अबि शब्दे।लबि अवस्रंसने च।कबृ वर्णे।क्लीबृ अधार्ष्ट्ये।क्षीबृ मदे।शी
४७ भृ कत्थने।चीभृ च।रेभृ शब्दे।अभि रभि च।ष्टभि स्कभि प्रतिबंधे।जभी जृभि गात्रविनामे।शल्भ क
दंत्यादिव त्थने।वल्भ भोजने।गल्भ धार्ष्ट्ये।श्रंभु प्रमादे।ष्टुभु स्तंभे।ति[illegible]याद्यउदात्ता अनुदात्तेत श्रि
५ पिवर्जमात्मनेभाषाः।गुपू रक्षणे।धूप संतापे।जप जल्प व्यक्तायां वाचि।जप मानसे च।चप सांत्व
ने।षप समवाये।रप लप व्यक्तायां वाचि।चुप मंदायां गतौ।तुप तुंप त्रुप त्रुंप तुफ तुंफ त्रुफ त्रुंफ हिंसार्थाः।
पर्फ रफ रफि अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ।कुबि आच्छादने।लुबि तुबि अर्दने।
चुबि वक्त्रसंयोगे।सृभु सृंभु हिंसार्थौ।षिभु षिंभु इत्येके।शुभ शुंभ भाषणे।हिंसायां च।ना अन्ये र
सने इत्येके।गुपाद्यउदात्ता उदात्तेतः परस्मैभाषाः॥ ॥ घिणि घुणि ग्रहणे।घुण घूर्णि भ्र णिर
मणे।पण व्यवहारे स्तुतौ च।पन च।भाम क्रोधे।क्षमूष् सहने।कमु कांतौ।१०॥ घिणया ३

द्यउदात्ता अनुदात्तेत आत्मनेभाषाः।अण रण वण भण मण कण क्वण व्रण भ्रण ध्वण शब्दार्थाः।ओण अप
नयने।शोणृ वर्णगत्योः।श्रोणृ संघाते।श्लोणृ च।पैणृ गतिप्रेरणश्लेषणेषु।ध्रण शब्दे।बणेत्यपि केचित्।
कनी दीप्तिकांतिगतिषु।ष्टन वन शब्दे।वन षण संभक्तौ।अम गत्यादिषु।द्रम हम्म मीमृ गतौ।चमु छमु जमु
झमु अदने।जिमु इत्यन्ये।क्रमु पादविक्षेपे।२२॥ अणाद्यउदात्ता उदात्तेतः परस्मैभाषाः।अय वय पय
मय चय तय णय गतौ।दय दानगतिरक्षणहिंसादानेषु।रय गतौ।ऊयी तंतुसंताने।पूयी विशरणे दु
र्गंधे च।क्नूयी शब्दे उंदे च।क्ष्मायी विधूनने।स्फायी ओप्यायी वृद्धौ।तायृ संतानपालनयोः।शल चल
नसंवरणयोः।वल वल्ल संवरणे संचरणे च।मल मल्ल धारणे।भल भल्ल परिभाषणहिंसादानेषु।क
ल शब्दसंख्यानयोः।कल्ल अव्यक्ते शब्दे।अशब्द इति स्वामी।तेवृ देवृ देवने।षेवृ गेवृ ग्लेवृ पेवृ मेवृ म्लेवृ
क्रे सेवने।शेवृ खेवृ क्लेवृ इत्येके।रेवृ प्लवगतौ।३५॥ अयाद्यउदात्ता अनुदात्तेत आत्मनेभाषाः।मव्य
बंधने।सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः।हय गतौ।शुच्य अभिषवे।चुच्य इत्यन्ये।हर्य गतिकांत्योः।अल
भूषणपर्याप्तिवारणेषु।ञिफला विशरणे।मील श्मील स्मील क्ष्मील निमेषणे।पील प्रतिष्टंभे।नील व
र्णे।शील समाधौ।कील बंधने।कूल आवरणे।शूल रुजायां संघोषे च।तूल निष्कर्षे।पूल संघाते।

मूलप्रतिष्ठायां। फल निष्पत्तौ। चुल्ल भावकरणे। फुल्ल विकसने। चिल्ल शैथिल्ये भावकरणे च। तिल गतौ। ति
ल्ल इत्यन्ये। वेल्ल चेल्ल केल्ल खेल्ल क्ष्वेल्ल वेल्ल चलने। पेल्ल फेल्ल शेल्ल गतौ। षेलृ इत्येके। स्खल संचलने। ख
ल संचये। गल अदने। षल गतौ। दल विशरणे। श्वल श्वल्ल आशुगमने। खोलृ खोरृ गतिप्रतिघाते। धो
रृ गतिचातुर्ये। त्सर छद्मगतौ। क्मर हूर्छने। अभ्र वभ्र मभ्र चर गत्यर्थाः। चरतिर्भक्षणेपि। ष्ठिवु निरस
ने। जि जये। जीव प्राणधारणे। पीव मीव तीव णीव स्थौल्ये। क्षिवु क्षेवु निरसने। उर्वी तुर्वी थुर्वी दुर्वी धुर्वी
हिंसार्थाः। गुर्वी उद्यमने। मुर्वी बंधने। पुर्व पर्व मर्व पूरणे। चर्व अदने। भर्व हिंसायां। कर्व खर्व गर्व द
र्पे। अर्व शर्व षर्व हिंसायां। इवि व्याप्तौ। पिवि मिवि णिवि सेचने। सेवने इत्येके। हिवि दिवि धिवि जिवि
प्रीणनार्थाः। रिवि रवि धवि गत्यर्थाः। कृवि हिंसाकरणयोश्च। मव बंधने। अव रक्षणगतिकांतिप्री
तितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिंगनहिंसादानभागवृद्धिषु।
मव्याद्य उदात्ता उदात्तेतो ऽयतिवर्जं परस्मैभाषाः। धावु गतिशुद्ध्योः। उदात्तः स्वरितेत् उभयतोभा
षः। धुक्ष धिक्ष संदीपनक्लेशनजीवनेषु। वृक्ष वरणे। शिक्ष विद्योपादाने। भिक्ष भिक्षायामलाभे ला
भे च। क्लेश अव्यक्तायां वाचि। बाधने इत्येके। दक्ष वृद्धौ शीघ्रार्थे च। दीक्ष मौंड्येज्योपनयननिय ४

मव्रतादेशेषु। ईक्ष दर्शने। ईष गतिहिंसादर्शनेषु। भाष व्यक्तायां वाचि। वर्ष स्नेहने। गेष्टृ अन्विच्छायां। ग्लेषृ इ
त्येके। येषृ प्रयत्ने। जेषृ णेषृ एषृ प्रेषृ गतौ। रेषृ हेषृ अव्यक्ते शब्दे। कासृ शब्दकुत्सायां। भासृ दीप्तौ।
णासृ रासृ शब्दे। णसृ कौटिल्ये। भ्यस भये। आङः शसि इच्छायां। ग्रसु ग्लसु अदने। ईह चेष्टायां।
बहि महि वृद्धौ। अहि गतौ। गर्ह गल्ह कुत्सायां। बर्ह बल्ह प्राधान्ये। वर्ह वल्ह परिभाषणहिंसाछादने
षु। प्लिह गतौ। वेहृ जेहृ बाहृ प्रयत्ने। जेह गत्यर्थोपि। द्राहृ निद्राक्षये। निक्षेपे इत्यन्ये। काशृ दीप्तौ।
ऊह वितर्के। गाहू विलोडने। गृहू ग्रहणे। ग्लह च। घुषि कांतिकरणे। घुषाद्य उदात्ता अनुदात्तेत आ
त्मनेभाषाः। घुषिर् अविशब्दने। शब्द इत्यन्ये। अक्षू व्याप्तौ। तक्षू त्वक्षू तनूकरणे। उक्ष सेचने। रक्ष पा
लने। णिक्ष चुंबने। त्रक्ष ष्टृक्ष णक्ष गतौ। वक्ष रोषे। संघाते इत्येके। मृक्ष संघाते। म्रक्ष इत्येके। तक्ष त्व
ने। पक्ष परिग्रह इत्येके। सूर्क्ष आदरे। काक्षि वाक्षि माक्षि कांक्षायां। द्राक्षि ध्राक्षि ध्वाक्षि घोरवाशिते च।
चूष पाने। तूष तुष्टौ। पूष वृद्धौ। मूष स्तेये। लूष रूष भूषायां। शूष प्रसवे। यूष हिंसायां। जूष च।
भूष अलंकारे। ऊष रुजायां। ईष उंछे। कष खष शिष जष झष शष वष मष रुष रिष हिंसार्थाः। न

पुषपुष्टौ।शिषुश्लिषुमृषुशुषुखुदाहे।रक्षुरक्षुमक्षुसेचने।१

प्लुषसनि उषदाहे।जिषुविषुमिषुसेचने।मृषुसहने च।इतरौ हिंसासंक्लेशनयोश्च।घृषुसंघर्षे।हृषुअली
२ण के।तुसक्रसह्रसरसशब्दे।लसश्लेषणक्रीडनयोः।घस्लृअदने।जर्जचर्चझर्झपरिभाषणहिंसातर्जनेषु।
पिसृपेसृगतौ।हसेहसने।णिशसमाधौ।मिशमशशब्दे रोषकृते च।शवगतौ।शशप्लुतगतौ।शसुहिंसा शाद
यां।शंसुस्तुतौ।चहपरिकल्कने।महपूजायां।रहत्यागे।रहिगतौ।दृहदृहिबृहबृहिवृद्धौ।तुहिर
हृच।बृहिर्।इतिचन्द्रः।तुहिरदुहिरउहिर्अर्दने।अर्हपूजायां।घुषिरादयउदात्ताउदात्तेतःपर
स्मैभाषाः।घुतुदीप्तौ।श्विताःवर्णे।ञिमिदास्नेहने।ञिष्विदास्नेहनमोचनयोः।मोहनयोरित्येके।ञि
क्ष्विदाचेत्येके।रुचदीप्तावभिप्रीतौच।घुटपरिवर्तने।रुटलुटलुठप्रतिघाते।शुभदीप्तौ।क्षुभसं
चलने।णभतुभहिंसायां।स्रंसुध्वंसुभ्रंसुअवस्रंसने।ध्वंसुगतौच।स्रम्भुविश्वासे।वृतुवर्तने।
वृधुवृद्धौ।शृधुशब्दकुत्सायां।स्यन्दूप्रस्रवणे।कृपूसामर्थ्ये।। ।।घुतादयउदात्ताअनुदात्तेतोवृत्
आत्मनेभाषाः।घटचेष्टायां।व्यथभयसंचलनयोः।प्रथप्रख्याने।प्रसविस्तारे।म्रदमर्दने।स्ख
दस्खदने।क्षजिगतिदानयोः।दक्षगतिहिंसनयोः।क्रपकृपायांगतौ।कदिक्रदिक्लदिवैक्लव्ये।वैक
्लव्यइत्यन्ये।कदक्रदक्लदइत्यन्ये।कदिक्रदिक्लदइत्यपरे।ञित्वरासंभ्रमे।घटादयःषितउदा ५

त्ताअनुदात्तेतआत्मनेभाषाः।ज्वररोगे।गडसेचने।हेडवेष्टने।वटभटपरिभाषणे।णटनृत्तौ।ष्टकप्रतीघाते।च
कदृप्तौ।कखेहसने।रगेशंकायां।लगेसंगे।ह्रगेह्लगेषगेष्टगेसंवरणे।कगेनोच्यते।अकअगकुटिलायां
गतौ।कणरणगतौ।चणशणश्रणदाने।च।शणगतावित्यन्ये।श्नथक्नथक्रथक्लथहिंसार्थाः।वनच।
वनुचनोच्यते।ज्वलदीप्तौ।ह्मलह्वलह्मलचलने।स्मृआध्याने।दृभये।नृनये।श्रापाके।मारणतोषण
निशामनेषुज्ञा।कम्पनेचलिः।छदिऊर्जने।जिह्मोन्मथनेलडिः।मदीहर्षग्लेपनयोः।ध्वनशब्दे।दलिव
लिस्खलिरणिध्वनित्रपिक्षपयश्च।स्वनअवतंसने।घटादयोमितः।जनीजृष्क्नसुरञ्जोऽमन्ताश्च।ज्वलह्वल
ह्मलनमामनुपसर्गाद्वा।ग्लास्नावनुवमांच।नकम्यमिचमां।शमोदर्शने।यमोऽपरिवेषणे।स्खदि
रवपरिभ्यांच।फणगतौ।। ।।घटादयःफणान्तामितः।वृत्।ज्वरादयउदात्ताउदात्तेतःपरस्मैभाषाः।।
राजृदीप्तौ।उदात्तस्वरितेदुभयतोभाषः।टुभ्राजृटुभ्राशृटुभ्लाशृदीप्तौ।उदात्ताअनुदात्तेतआत्मनेभा
षाः।स्यमुस्वनध्वनशब्दे।षमष्टमअवैकल्ये।ज्वलदीप्तौ।चलकम्पने।जलघातने।टलट्वलवैक्ल
व्ये।ष्ठलस्थाने।हलविलेखने।णलगंधे।बंधनइत्येके।पलगतौ।बलप्राणनेधान्यावरोधनेच।पुल
महत्वे।कुलसंस्त्यानेबन्धुषुच।शलहुलपत्लृगतौ।क्वथेनिष्पाके।पथगतौ।मथेविलोडने।टुवम

उज्झिरणे। अमु चलने। ह्मल संचलने। स्यमादय उदात्ता उदात्तेतः परस्मैभाषाः। षह मर्षणे। उदात्तोऽनुदात्तेदात्मनेप
दी। रमु क्रीडायां। अनुदात्तोऽनुदात्तेदात्मनेपदी॥ षद्लृ विशरणगत्यवसादनेषु। शद्लृ शातने। क्रुश आह्वाने रो
दने च। सदादय उदात्ता त्रयोऽनुदात्ता उदात्तेतः परस्मैभाषाः॥ ॥ कुच संपर्चनकौटिल्यप्रतिष्टंभविलेखनेषु। बुध
अवगमने। रुह बीजजन्मनि प्रादुर्भावे च। कस गतौ। कुचादय उदात्ता उदात्तेतः हिक्क्यनुदात्तः परस्मैभाषाः।
हृत्। हिक्क अव्यक्ते शब्दे। अञ्चु गतौ। याचने च। अचु इत्येके। अचि इत्यपरे। टुयाचृ याच्ञायां। रेटृ परिभा
षणे। चते चदे याचने। प्रोथृ पर्याप्तौ। मिदृ मेदृ मेधाहिंसयोः। मेधृ संगमे च। मिथृ मेथृ मे। धाहिंसयोरित्येके।
मिधृ मेधृ इत्यन्ये। णिदृ णेदृ कुत्सासंनिकर्षयोः। शृधु मृधु उंदने। बुधिर् बोधने। उबुंदिर् निशामने।
वेणृ गतिज्ञानचिंतानिशामनवादित्रग्रहणेषु। वेन इत्येके। खनु अवदारणे। चीवृ आदानसंवरणयोः। चा
यृ पूजानिशामनयोः। व्यय गतौ। दाशृ दाने। भेषृ भये। भ्रेषृ गतौ। भ्लेषृ इत्यपि। अस गतिदीप्त्यादानेषु।
अष इत्येके। स्पश बाधनस्पर्शनयोः। लष कांतौ। चष भक्षणे। छष हिंसायां। झष आदानसंवरणयोः। भ्ल रु३
क्ष अदने। दासृ दाने। माहृ माने। गुहू संवरणे। श्रिञादय उदात्ता उदात्तेतः स्वरितेत उभयतोभाषाः। श्रिञ्
सेवायां। उदात्त उभयतोभाषः। भृञ् भरणे। हृञ् हरणे। धृञ् धारणे। णीञ् प्रापणे। भृञादयश्चत्वारो ६

ऽनुदात्ता उभयतोभाषाः। धेट् पाने। ग्लै म्लै हर्षक्षये। द्यै न्यक्करणे। द्रै स्वप्ने। ध्रै तृप्तौ। ध्यै चिंतायां। रै शब्दे। स्त्यै ष्ट्यै शब्दसंघा
तयोः। खै खदने। क्षै जै षै क्षये। कै गै शब्दे। श्रै पाके। पै ओवै शोषणे। ष्टै वेष्टने। ष्णै वेष्टने। शोभायां चेत्येके। दैप् शो
धने। पा पाने। घ्रा गंधोपादाने। ध्मा शब्दाग्निसंयोगयोः। ष्ठा गतिनिवृत्तौ। म्ना अभ्यासे। दाण् दाने। ह्वृ कौ
टिल्ये। स्वृ शब्दोपतापयोः। स्मृ चिंतायां। ह्वृ संवरणे। सृ गतौ। ऋ गतिप्रापणयोः। गृ घृ सेचने। ध्वृ
५सु हूर्छने। श्रु गतौ। षु प्रसवैश्वर्ययोः। श्रु श्रवणे। ध्रु स्थैर्ये। दु द्रु गतौ। जि ज्रि अभिभवे। घ्यत्यादयोऽनु
दात्ताः परस्मैभाषाः। ष्मिङ् ईषद्धसने। गुङ् अव्यक्ते शब्दे। गाङ् गतौ। कुङ् घुङ् उङ् ङुङ् शब्दे। च्युङ् ज्यु
५इत्येके ङ् प्रुङ् प्लुङ् गतौ। रुङ् रुङ् गतिरेषणयोः। धृङ् अवध्वंसने। मेङ् प्रणिदाने। देङ् रक्षणे। श्यैङ्
गतौ। प्यैङ् वृद्धौ। त्रैङ् पालने॥ १८॥ ष्मिङ् प्रभृतय एते दंता अनुदात्ता आत्मनेभाषाः। पूङ् पवने। मू
ङ् बंधने। डीङ् विहायसा गतौ। पूङादयस्त्रय एते उदात्ता आत्मनेभाषाः॥ ३॥ तॄ प्लवनतरणयोः।
उदात्तः परस्मैभाषः। गुप गोपने। तिज निशाने। मान पूजायां। बध बंधने॥ ४॥ गुपादयश्चत्वारोऽनुदा
त्तेत आत्मनेभाषाः। रभ राभस्ये। डुलभष् प्राप्तौ। ष्वंज परिष्वंगे। हद पुरीषोत्सर्गे। रभादयश्चत्वारो

नुदात्ता अनुदात्तेत आत्मनेभाषाः॥ ष्ठिविदा अव्यक्ते शब्दे। उदात्त उदात्तेत्परस्मैपदी॥ स्कंदिर् गतिशोषणयोः। यभ मै-
थुने। णम प्रह्वत्वे शब्दे च। गम्लृ स्टृप्लृ गतौ। यम उपरमे। तप संतापे। त्यज हानौ। षंज संगे। दृशिर् प्रेक्षणे। दंश द-
शने। कृष विलेखने। दह भस्मीकरणे। मिह सेचने॥ १४॥ स्कंधादयोनुदात्ता उदात्तेतः परस्मैभाषाः। कित नि-
वासे रोगापनयने च। उदात्तेत्परस्मैपदी। दान खंडने। शान तेजने। स्वरितेतावुभयतोभाषौ। डुपचष् पाके। ष-
च समवाये। भज सेवायां। रंज रागे। शप आक्रोशे। त्विष दीप्तौ। यज देवपूजासंगतिकरणदानेषु। डुवप्
बीजसंताने। वह प्रापणे। ९॥ पचादयोनुदात्ताः स्वरितेतः स्वतित्तूदात्त उभयतोभाषाः॥ वस निवासे॥
अनुदात्त उदात्तेत्परस्मैपदी। वेञ् तंतुसंताने। व्येञ् संवरणे। ह्वेञ् स्पर्धायां शब्दे च। वेञादयस्त्रयोनुदा-
त्ता उभयतोभाषाः। वद व्यक्तायां वाचि। टुओश्वि गतिवृद्ध्योः। इता अयं वदतिश्वोदात्तौ परस्मैभाषौ॥
इति शप्विकरणा भ्वादयो धातवः॥ अद भक्षणे। हन हिंसागत्योः। अदिहनौ उदात्तावुदात्तेतौ पर-
स्मैपदिनौ। द्विष अप्रीतौ। दुह प्रपूरणे। दिह उपचये। लिह आस्वादने। ४॥ द्विषादयोनुदात्ताः स्वरितेत उ-
भयतोभाषाः। चक्षिङ् व्यक्तायां वाचि। अयमुदात्तोनुदात्तेदात्मनेपदी॥ ईर गतौ कंपने च। ईड स्तुतौ। ईश ७
ऐश्वर्ये। आस उपवेशने। आङः शासु इच्छायां। वस आच्छादने। कृसि गतिशासनयोः। कस इत्येके। कुश गति

इदित्यन्ये। वृजेह॰ १
गतिशासनयोरिति केचित्। णिसि चुंबने। णिजि शुद्धौ। शिजि अव्यक्ते शब्दे। पिजि वर्णे। पृजी त्येके। वृजी वर्जने। पृची सं-
पर्चने। ईरादय उदात्ता अनुदात्तेत आत्मनेभाषाः। षूङ् प्राणिगर्भविमोचने। शीङ् स्वप्ने। आत्मनेभाषावुदात्तौ।
यु मिश्रणे अमिश्रणे च। रु शब्दे। णु स्तुतौ। टुक्षु शब्दे। क्ष्णु तेजने। स्नु प्रस्रवणे। युप्रभृतय उदात्ताः परस्मैभाषाः।
ऊर्णुञ् आच्छादने। उदात्त उभयतोभाषः। द्यु अभिगमने। षु प्रसवैश्वर्ययोः। कु शब्दे। अनुदात्ताः परस्मैभाषाः।
ष्टुञ् स्तुतौ। अनुदात्त उभयतोभाषः। ब्रूञ् व्यक्तायां वाचि। उदात्त उभयतोभाषः। इण् गतौ। इङ् अध्ययने। इक्
स्मरणे। वी गतिप्राप्तिप्रजनकान्त्यसनखादनेषु। या प्रापणे। वा गतिगंधनयोः। भा दीप्तौ। ष्णा शौचे। श्रा पाके।
द्रा कुत्सायां गतौ। प्सा भक्षणे। पा रक्षणे। रा दाने। ला आदाने। दाव पि दाने इति चंद्रः। दाप् लवने। ख्या प्रकथने।
प्रा पूरणे। मा माने। वच परिभाषणे। इण्प्रभृतयोनुदात्ताः परस्मैभाषाः। इङ् त्वात्मनेपदी। विद ज्ञाने। अस
भुवि। मृजू शुद्धौ। रुदिर् अश्रुविमोचने। विदादय उदात्ता उदात्तेतः परस्मैभाषाः। ञिष्वप् शये। उदात्तेदनु-
दात्तः परस्मैपदी। श्वस प्राणने। अन च। जक्ष भक्षहसनयोः। जागृ निद्राक्षये। दरिद्रा दुर्गतौ। चकासृ दीप्तौ।
शासु अनुशिष्टौ। श्वसादय उदात्ता उदात्तेतः परस्मैभाषाः। दीधीङ् दीप्तिदेवनयोः। वेवीङ् वेतिना तुल्ये।
उदात्तावात्मनेभाषौ। षस षस्ति स्वप्ने। वश कान्तौ। षसादय उदात्ता उदात्तेतः परस्मैभाषाः। चर्करीतं च॥
ह्नुङ् अपनयने। अनुदात्तेत् आत्मनेभाषः। इति लुग्विकरणा अदादयः। हु दानादनयोः। ञिभी भ-

ष्वाह्रीलज्जायां। अनुदात्ताः परस्मैभाषाः। पॄ पालनपूरणयोः। उदात्तः परस्मैभाषः॥ डुभृञ् धारणपोषणयोः॥
अनुदात्त उभयतोभाषः। माङ् माने शब्दे च। ओहाङ् गतौ। अनुदात्तावात्मनेपदिनौ। ओहाक् त्यागे। अनुदात्तः प
रस्मैपदी॥ डुदाञ् दाने। डुधाञ् धारणपोषणयोः। उभयतोभाषावनुदात्तौ॥ णिजिर् शौचपोषणयोः॥
विजिर् पृथग्भावे। विष्लृ व्याप्तौ। स्वरितेतोनुदात्ता उभयतोभाषाः। घृ क्षरणदीप्त्योः। हृ प्रसह्यकरणे। सृ
गतौ। अनुदात्ताः परस्मैभाषाः। भस भर्त्सनदीप्त्योः। उदात्त उदात्तेत् परस्मैपदी॥ कि ज्ञाने। अनुदात्तः परस्मै
भाषः। तुर त्वरणे। धिष शब्दे। धन धान्ये। जन जनने। तुराद्य उदात्ता उदात्तेतः परस्मैभाषाः॥ गा स्तुतौ। अनुदात्तः
परस्मैभाषः। छंदसि। वृत्। इति श्लुविकरणा जुहोत्यादयः॥ दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्व
प्नकांतिगतिषु। षिवु तंतुसंताने। स्रिवु गतिशोषणयोः। ष्ठिवु निरसने। ष्णुसु अदने। आदान इत्यपरे। अद
र्शन इत्येके। ष्णसु निरसने। क्नसु ह्वरणदीप्त्योः। व्युष दाहे। प्लुष च। नृती गात्रविक्षेपे। त्रसी उद्वेगे। कुथ पू
तीभावे। पुथ हिंसायां। गुध परिवेष्टने। क्षिप प्रेरणे। पुष्प विकसने। तिम ष्टिम ष्टीम आर्द्रीभावे। व्रीड च
दने लज्जायां च। इष गतौ। षह षुह चक्यर्थे। जॄष् झॄष् वयोहानौ। दिवादय उदात्ता उदात्तेतः क्षिपिवर्जं प
रस्मैभाषाः॥ षूङ् प्राणिप्रसवे। दूङ् परितापे। आत्मनेभाषावुदात्तौ। दीङ् क्षये। डीङ् विहायसा गतौ। ८
धीङ् आधारे। मीङ् हिंसायां। रीङ् स्रवणे। लीङ् श्लेषणे। व्रीङ् वृणोत्यर्थे। वृत्। स्वादय ओदितः॥

शो तनूकरणे। छो छेदने। षो अंतकर्मणि। दो अवखंडने। श्यतिप्रभृतयोनुदात्ताः पर स्मैभाषाः॥
पीङ् पाने। माङ् माने। ईङ् गतौ। प्रीङ् प्रीणने। दीङादय आत्मनेपदिनो डीङ्वर्जमनुदात्ताः। परस्मैभाषाः। जनी
प्रादुर्भावे। दीपी दीप्तौ। पूरी आप्यायने। तूरी गतित्वरणहिंसनयोः। धूरी गूरी हिंसागत्योः। घूरी जूरी हिंसा
वयोहान्योः। शूरी हिंसास्तंभनयोः। चूरी दाहे। तप ऐश्वर्ये वा। वृतु वरणे। क्लिश उपतापे। काशृ दीप्तौ। वाशृ
शब्दे। जन्यादय उदात्ता अनुदात्तेतस्तपिवर्जमात्मनेभाषाः। मृष तितिक्षायां। ईशुचिर् पूतीभावे। उदा
त्तौ स्वरितेतावुभयतोभाषौ। णह बंधने। रंज रागे। शप आक्रोशे। णहादयस्त्रयोनुदात्ताः स्वरितेत उभयतो
भाषाः॥ पद गतौ। खिद दैन्ये। विद सत्तायां। बुध अवगमने। युध संप्रहारे। अनो रुध कामे। अण प्राणने
। अनेत्येके। मन ज्ञाने। युज समाधौ। सृज विसर्गे। लिश अल्पीभावे। पदादयोनुदात्ता अनुदात्तेतोणप
तिवर्जमात्मनेभाषाः। राधोकर्मकाद्वृद्धावेव। व्यध ताडने। पुष पुष्टौ। शुष शोषणे। तुष प्रीतौ। दुष वैकृ
त्ये। श्लिष आलिंगने। शक विभाषितो मर्षणे। ष्विदा गात्रप्रक्षरणे। क्रुध कोपे। क्षुध बुभुक्षायां। शुध शौ ञिष्विदेति
चे। षिधु संराद्धौ। राधादयोनुदात्ता उदात्तेतः परस्मैभाषाः॥ रध हिंसासंराद्ध्योः। णश अदर्शने। तृप प्रीण केचित्
ने। दृप हर्षमोहनयोः। द्रुह जिघांसायां। मुह वैचित्त्ये। ष्णुह उद्गिरणे। ष्णिह प्रीतौ। वृत्। रधादय उदात्ता उ
दात्तेतः परस्मैभाषाः। शमु उपशमे। तमु कांक्षायां। दमु उपशमे। श्रमु तपसि खेदे च। भ्रमु अनवस्थाने।

क्षमूष सहने। क्लमु ग्लानौ। मदी हर्षे। असु क्षेपणे। यसु प्रयत्ने। जसु मोक्षणे। तसु उपक्षये। दसु च। वसु स्तंभे। व्युष
विभागे। प्लुष दाहे। बिस प्रेरणे। कुस संश्लेषणे। बुस उत्सर्गे। मुस खंडने। मसी परिणामे। समी इत्येके। लुट वि
५२ लोडने। उच समवाये। भृशु भ्रंशु अधःपतने। वृश वरणे। कृश तनूकरणे। ञितृष पिपासायां। हृष तुष्टौ। रु
ष रिष हिंसायां। डिप क्षेपे। कुप क्रोधे। गुप व्याकुलत्वे। युप रुप लुप विमोहने। लुभ गार्ध्ये। क्षुभ संचलने॥
णभ तुभ हिंसायां। क्लिदू आर्द्रीभावे। ञिमिदा स्नेहने। ञिक्ष्विदा स्नेहनमोचनयोः। ऋधु वृद्धौ। गृधु अभि
कांक्षायां। हत्। शमादय उदात्ता उदात्तेतः परस्मैभाषाः॥ ॥इति श्यन्विकरणा दिवादयः॥ षुञ् अभि
षवे। षिञ् बंधने। शिञ् निशाने। डुमिञ् प्रक्षेपणे। चिञ् चयने। स्तृञ् आच्छादने। कृञ् हिंसायां। वृञ् वरणे।
धुञ् धूञ् कंपने। स्वादय उभयतोभाषाः। वृञ्वर्जमनुदात्ताः। टुदु उपतापे। हि गतौ वृद्धौ च। पृ प्रीतौ। स्पृ प्री
तिपालनयोः। स्मृ इत्येके। आप्लृ व्याप्तौ। शक्लृ शक्तौ। राध साध संसिद्धौ। दुनोतिप्रभृतयोऽनुदात्ताः प
रस्मैभाषाः॥ अशू व्याप्तौ संघाते च। ष्टिघ आस्कंदने। उदात्तावनुदात्तेतावात्मनेभाषौ। तिक तिग
च। षघ हिंसायां। ञिधृषा प्रागल्भ्ये। दंभु दंभने। ऋधु वृद्धौ। तृप प्रीणन इत्येके। छंदसि। अह व्याप्तौ।
दघ घातने पालने च। चमु भक्षणे। रि क्षि चिरि जिरि दाश दृ हिंसायां। हत्। तिकादय उदात्ता उद

त्तेतः परस्मैभाषाः॥ इति श्नुविकरणाः स्वादयः॥ तुद व्यथने। णुद प्रेरणे। दिश अतिसर्जने। भ्रस्ज पाके। क्षिप प्रेरणे।
कृष विलेखने। तुदादय उदात्ताः स्वरितेत उभयतोभाषाः। ऋषी गतौ। उदात्त उदात्तेत् परस्मैपदी। जुषी प्री
तिसेवनयोः। ओविजी भयचलनयोः। ओलजी ओलस्जी व्रीडने। जुषादय उदात्ता अनुदात्तेत आत्मनेभाषाः।
ओव्रश्चू छेदने। व्यच व्याजीकरणे। उछि उंछे। उछी विवासे। ऋछ गतींद्रियप्रलयमूर्तिभावेषु। मिछ उत्क्लेशे। ज
र्झ चर्च झर्झ परिभाषणभर्त्सनयोः। त्वच संवरणे। ऋच स्तुतौ। उब्ज आर्जवे। उज्झ उत्सर्गे। लुभ विमोहने॥
रिफ कत्थनयुद्धनिंदाहिंसादानेषु। रिह इत्येके। तृप तृंफ तृप्तौ। द्वावपि फांतावित्यन्ये। तुप तुंप तुफ तुंफ हिं
सा [illegible]। दृप दृंफ उत्क्लेशे। ऋफ ऋंफ हिंसायां। गुफ गुंफ ग्रंथे। उभ उंभ पूरणे। शुभ शुंभ शोभार्थे।
दृभी ग्रंथे। चृती हिंसाग्रंथनयोः। विध विधाने। जुड गतौ। मृड सुखने। पृड च। पृण प्रीणने। वृण च। मृण हिंसा
यां। तुण कौटिल्ये। पुण कर्मणि शुभे। मुण प्रतिज्ञाने। कुण शब्दोपकरणयोः। शुन गतौ। द्रुण हिंसागतिकौ
टिल्येषु। घुण घूर्ण भ्रमणे। षुर ऐश्वर्यदीप्त्योः। कुर शब्दे। खुर छेदने। मुर संवेष्टने। क्षुर विलेखने। घुर भीमा
र्थशब्दयोः। पुर अग्रगमने। वृहू उद्यमने। तृहू स्तृहू तृंहू हिंसार्थाः। इष इच्छायां। मिष स्पर्द्धायां। किल श्वै
त्यक्रीडनयोः। तिल स्नेहे। चिल वसने। चल विलसने। इल स्वप्नक्षेपणयोः। बिल संवरणे। बिल भेदने।

णि लगहने। हिल भावकरणे॥ शिल षिल उंछे। मिल श्लेषणे। लिख अक्षरविन्यासे। कुट कौटिल्ये। पुट संश्लेषणे। कुच सं
कोचने। गज शब्दे। गुड रक्षायां। डिप क्षेपे। छुर छेदने। स्फुट विकसने। मुट आक्षेपप्रमर्दनयोः। त्रुट छेदने। तुट क
लहकर्मणि। चुट छुट छेदने। जुड बंधने। कड मदे। लुठ संश्लेषणे। कृड घनत्वे। कुड बाल्ये। पुड उत्सर्गे। घुट प्रती
घाते। तुड तोडने। थुड स्थुड संवरणे। खुड छुड इत्येके। स्फुर स्फुल संचलने। स्फुर स्फुरणे। स्फुल संचलन इत्येके।
स्फर इति केचित्। स्फुड चुड व्रुड संवरणे। क्रुड श्चेत्येके। नुड निमज्जन इत्येके। अस्वादय उदात्ता उदात्तेतः परस्मैभा
षाः॥ गुरी उद्यमने। उदात्तोनुदात्तेदात्मनेपदी। णू स्तवने। धू विधूनने। गु पुरीषोत्सर्गे। ध्रु गतिस्थैर्ययोः। ध्रु
व इति वा। अयं ह्रस्वैव उदात्ताः परस्मैपदिनः। कुङ् शब्दे। कुङ् उदात्त आत्मनेपदी। वृत्। पृङ् व्यायामे। मृङ् प्राण इत्येके १
त्यागे। अनुदात्तावात्मनेभाषौ। रि पि गतौ। धि धारणे। क्षि निवासगत्योः। रियत्यादयोनुदात्ताः परस्मैभाषाः।
षू प्रेरणे। कॄ विक्षेपे। गॄ निगरणे। उदात्ताः परस्मैभाषाः॥ दृङ् आदरे। धृङ् अवस्थाने। अनुदात्तावात्मनेभाषौ।
प्रच्छ ज्ञीप्सायां। वृत्। सृज विसर्गे। टुमस्जो शुद्धौ। रुजो भंगे। भुजो कौटिल्ये। छुप स्पर्शे। रुश रिश हिंसायां। लि
गतौ। स्पृश संस्पर्शने। विछ गतौ। विश प्रवेशने। मृश आमर्शने। णुद प्रेरणे। षद्लृ विशरणगत्यवसादनेषु॥
शद्लृ शातने। षद्लृत्यादयोनुदात्ता उदात्तेतः परस्मैभाषा विछिस्तूदात्तः। मिल संगमे। उदात्तः स्वरितेदुभ १०

यतोभाषः। मुच्लृ मोक्षणे। लुप्लृ छेदने। विद्लृ लाभे। लिप उपदेहे। षिच क्षरणे। मुचादयोनुदात्ताः स्वरितेतो विंदतिस्तूदा
त्त उभयतोभाषाः। कृती छेदने। उदात्त उदात्तेत्परस्मैपदी॥ खिद परिघाते। अनुदात्त उदात्तेत्परस्मैपदी॥ पि
श अवयवे। उदात्त उदात्तेत्परस्मैपदी॥ वृत्॥ इति शविकरणास्तुदादयः॥ रुधिर् आवरणे। भिदिर् विदारणे।
छिदिर् द्वैधीकरणे। रिचिर् विरेचने। विचिर् पृथग्भावे। क्षुदिर् संपेषणे। युजिर् योगे। रुधादयोनुदात्ताः
स्वरितेत उभयतोभाषाः॥ उछृदिर् दीप्तिदेवनयोः। उतृदिर् हिंसानादरयोः। छृदितृदौ उदात्तौ स्वरितेता उ
भयतोभाषौ। कृती वेष्टने। उदात्त उदात्तेत्परस्मैपदी॥ ञिइंधी दीप्तौ। उदात्तोनुदात्तेदात्मनेपदी॥ खिद दैन्ये।
विद विचारणे। अनुदात्तावनुदात्तेतावात्मनेभाषौ। शिष्लृ विशेषणे। पिष्लृ संचूर्णने। भंजो आमर्दने। भुज
पालनाभ्यवहारयोः। अनुदात्ता उदात्तेतः परस्मैभाषाः। तृह हिंसि हिंसायां। उंदी क्लेदने। अंजू व्यक्ति
म्रक्षणकांतिगतिषु। तंचू संकोचने। ओविजी भयचलनयोः। वृजी वर्जने। पृची संपर्के। उदात्ता उदात्तेतः परस्मैभा
षाः॥ ॥वृत्॥ इति श्नम्विकरणा रुधादयः॥ ॥तनु विस्तारे। षणु दाने। क्षणु हिंसायां। क्षिणु च। ऋणु गतौ।
तृणु अदने। घृणु दीप्तौ। उदात्ताः स्वरितेत उभयतोभाषाः। वनु याचने। मनु अवबोधने। उदात्तावनुदा
त्तेतावात्मनेभाषौ। डुकृञ् करणे। अनुदात्त उभयतोभाषः। इति उविकरणास्तनादयः॥ डुक्रीञ् द्र

थविनिमये।प्रीञ्तर्पणेकांतौच।श्रीञ्पाके।मीञ्हिंसायां।षिञ्बंधने।स्कुञ्आप्रवणे।युञ्बंधने।अनुदात्ता
उभयतोभाषाः।क्नूञ्शब्दे।द्रूञ्हिंसायां।पूञ्पवने।लूञ्छेदने।स्तॄञ्आच्छादने।कॄञ्हिंसायां।
वृञ्वरणे।धूञ्कंपने उदात्ताउभयतोभाषाः।शॄहिंसायां।पॄपालनपूरणयोः।वॄवरणे।भॄभर्त्सने।मॄ
हिंसायां।दॄविदारणे।जॄवयोहानौ।झॄइत्येके।धॄइत्यन्ये।नॄनये।कॄहिंसायां।ॠगतौ।गॄशब्दे।ऋणाति
अन्तयउदात्ताःपरस्मैभाषाः।ज्यावयोहानौ।रीगतिरेषणयोः।लीश्लेषणे।व्लीवरणे।प्लीगतौ।वृत्।
व्रीवरणे।भ्रीभये।क्षीष्हिंसायां।ज्ञाअवबोधने।बंधबंधने।ज्यादयअनुदात्ताःपरस्मैभाषाः।वृङ्सं
भक्तौ।उदात्तआत्मनेपदी।श्रंथविमोचनप्रतिहर्षयोः।मंथविलोडने।श्रंथग्रंथसंदर्भे।कुंथसंश्लेषणे।
कुथेतिदुर्गः।मृदक्षोदे।मृडच।गुधरोषे।कुषनिष्कर्षे।क्षुभसंचलने।णभतुभहिंसायां।।क्लिशूविबा
धने।अशभोजने।उध्रसउंछे।इषआभीक्ष्ण्ये।विषविप्रयोगे।प्रुषप्लुषस्नेहसेवनपूरणे।पुषपुष्टौ।
मुषस्तेये।खचभूतप्रादुर्भावे।हेठच।उदात्ताअनुदात्तेतोविषिवर्जंपरस्मैभाषाः।। ।ग्रहउपादाने।उदात्तः
स्वरितेदुभयतोभाषः।।इतिश्नाविकरणाःक्र्यादयः।।चुरस्तेये।चितिस्मृत्यां।यत्रिसंकोचने।स्फुडिपरि
हासे।स्फुटितिपाठांतरं।लक्षदर्शनांकनयोः।कुद्रिअनृतभाषणे।लडउपसेवायां।मिदिस्नेहने।ओल ११

डिउत्क्षेपे।उदित्वादुकारादिर्वा।जलअपवारणे।लजइत्येके।पीडअवगाहने।नटअवस्यंदने।श्रथप्रयत्ने।प्रस्था
नेइत्येके।बधसंयमने।बंधेतिचांद्राः।पॄपूरणे।ऊर्जबलप्राणनयोः।पक्षपरिग्रहे।वर्णप्रेरणे।वर्ण
वर्णने।चूर्णप्रेरणे।इतिकेचित्।प्रथप्रख्याने।पृथप्रक्षेपे।पथइत्येके।षंबसंबंधने।शंबच।सांबइ
तिकेचित्।~~प्रथप्रख्याने।पृथप्रक्षेपे।पथइत्येके~~।भक्षअदने।कुट्टछेदनभर्त्सनयोः।पुटइत्येके।
पुट्टचुट्टअल्पीभावे।अट्टषुट्टअनादरे।लुंटस्तेये।शठश्वठअसंस्कारगत्योः।श्वठिइत्येके।तुजिपिजि
हिंसाबलादाननिकेतनेषु।तुजपिजइतिकेचित्।लजिलुजिइतिकेचित्।पिसगतौ।षांत्वसामप्रयो
गे।श्वल्कवल्कपरिभाषणे।ष्णिहस्नेहने।स्फिटइत्येके।स्मिटअनादरे।ष्मिङ्अनादरइत्येके।श्लि
षश्लेषणे।पथिगतौ।पिच्छकुट्टने।छदिसंवरणे।श्रणदाने।तडआघाते।खडखडिकडिभेदने।कुडि
रक्षणे।गुडिवेष्टने।रक्षणइत्येके।कुठिइतिकेचित्।गुठिइत्यपरे।खुडिखंडने।वडिविभाजने।वडिच।म
डिभूषायांहर्षेच।भडिकल्याणे।छर्दवमने।पुस्तबुस्तआदरानादरयोः।चुदसंचोदने।नक्कधक्कनाश
ने।चक्कचुक्कव्यथने।क्षलशौचकर्मणि।तलप्रतिष्ठायां।तुलउन्माने।दुलउत्क्षेपे।पुलमहत्वे।चुलसमुच्छ्रा
ये।मूलरोहणे।कलविलक्षेपे।बिलभेदने।तिलस्नेहने।चलभृतौ।पालरक्षणे।लूषहिंसायां।शुल्ब

माने। शूर्पमाने इति केचित्। चुट छेदने। मुट संचूर्णने। पडि पसि नाशने। व्रज मार्गसंस्कारगत्योः। शुल्क
अतिस्पर्शने। चपि गत्यां। क्षपि क्षान्त्यां। छजि कृच्छ्रजीवने। श्वर्त गत्यां। श्वभ्र च। ज्ञप मिच्च। यमश्च परि
वेषणे। चह परिकल्कने। चप इत्येके। रह त्यागे। इत्येके। बल प्राणने। चिञ् चयने। नान्ये मितोऽहेतौ। घ
ट्ट चलने। मुस्त संघाते। खट्ट संवरणे। षट्ट स्फिट्ट चुबि हिंसायां। पूल संघाते। पूणघ्रुणाइत्येके।
पुंस अभिवर्धने। टकि बंधने। धूस कांतिकरणे। कीट वर्णे। चूर्ण संकोचने। पूज पूजायां। अर्क स्तवने। तप
न इत्येके। शुठ आलस्ये। शुठि शोषणे। जुड प्रेरणे। गज मार्ग शब्दार्थौ। मिर्च इत्येके। घृ प्रस्रवणे। पचि विस्ता
६७ र वचने। तिज निशाने। कृत संशब्दने। वर्ध छेदनपूरणयोः। कुबि छादने। लुबि तुबि अर्दने। अ ऊर्मिरित्येके ६
र्दन इत्येके। ह्लप व्यक्तायां वाचि। क्लप इत्येके। चुटि छेदने। इल प्रेरणे। म्रक्ष म्लेछने। म्लेछ अव्यक्तायां
वाचि। ब्रूस बर्ह हिंसायां। गर्ज गर्द शब्दे। गर्ध अभिकांक्षायां। गुर्द पूर्व निकेतने। जसि रक्षणे। मोक्षणे वा।
ईड स्तुतौ। जसु हिंसायां। पिडि संघाते। रुष रोषे। रुट इत्येके। डिप क्षेपे। ष्टुप समुच्छ्राये। आकुस्मादात्म
नेपदिनः। चित संचेतने। दशि दंशने। दसि दंशनदर्शनयोः। दस इत्यप्येके। डप डिप संघाते। तत्रि कुटुं
बधारणे। मत्रि गुप्तपरिभाषणे। स्पश ग्रहणसंश्लेषणयोः। तर्ज भर्त्स तर्जने। वस्त गंध अर्दने। २२

विष्क हिष्क हिंसायां। हिक्क इत्येके। निष्क परिमाणे। लल ईप्सायां। कूण संकोचने। तूण पूरणे। भ्रूण आशाविशंक
योः। शठ श्लाघायां। यक्ष पूजायां। स्यम वितर्के। गूर उद्यमने। शम लक्ष आलोचने। कुत्स अवक्षेपणे। त्रुट छे
दने। कुट इत्येके। गल स्रवणे। भल आभंडने। कूट आप्रदानावसादनयोः। कुट्ट प्रतापने। वंचु प्रलंभने। वृष
शक्तिबंधने। मद तृप्तियोगे। दिवु परिकूजने। गृ विज्ञाने। विद चेतनाख्याननिवासेषु। मन स्तंभे। युजु
गुप्सायां। कुस्म नाम्नो वा। इत्याकुस्मीयाः। चर्च अध्ययने। बुक्क भाषणे। शब्द उपसर्गादाविष्कारे च। अ
नुपसर्गाच्च। कण निमीलने। जभि नाशने। षूद क्षरणे। जसु ताडने। पश बंधने। अम रोगे। चट स्फुट भे
दने। घट संघाते। हंत्यर्थाश्च। दिवु मर्दने। अर्ज प्रतियत्ने। घुषिर् विशब्दने। आङः क्रंद सातत्ये। लस शि
ल्पयोगे। तसि भूष अलंकरणे। अर्ह पूजायां। ज्ञा नियोगे। भज विश्राणने। शृधु प्रसहने। यत निकारोप
स्कारयोः। रक लग आस्वादने। रघ इत्येके। रग इत्यन्ये। अंचु विशेषणे। लिगि चित्रीकरणे। मुद संसर्गे। त्रस
धारणे ग्रहणे इत्येके। वारण इत्यन्ये। उध्रस उंछे। मुच प्रमोचने मोदने च। वस स्नेहनछेदापहरणेषु। चर
संशये। च्यु सहने। हसने इत्येके। च्युस इत्यन्ये। भुवोऽवकल्कने। कृपेश्च। कृपेस्तादर्थ्ये इति केचित्। आ

त्वदः सकर्मकात्।ग्रस ग्रहणे।पुष धारणे।दल विदारणे।थ।।कुडच्छ स्सले परपुट लुट तुजि मिजि पिजि लुजि
भजि त्रसि पिसि कुसि दसि कुशि घट घटि बृहि बर्हबिल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क
वृतु वृधु भाषार्थाः।कूट लजि अजि दसि भ्रत्स शिक्ष शिश कूनर दुघ रिजि चिर घिल वि श्र हिरि हिमि हिक्ष।लजि ति
डनलव।पूरी आप्यायने।रुज हिंसायां।ष्वद आ स्वादने।आ ध बाधा।युज पृच संयमने।अर्च पूजायां।षु
ह मर्षणे।ईर क्षेपे।लीङ् द्रवीकरणे।वृजी वर्जने।वृञ् आवरणे।जृ वयोहानौ।ज्रि च।रिच वियोजन संपर्चने
याः।शिष असर्वोपयोगे।तपदाहे।त्रप स्पर्शे।छृदी संदीपने।दृप दृभ ग्रन्थ संदर्भे।छृद इत्येके।इञ नये।दं
भसंदर्भे।श्रथ मोक्षणे।मी गतौ।ग्रंथ बंधने।शीक आमर्षणे।चीक च।अर्द हिंसायां।हिसि हिंसायां।अर्ह
पूजायां।आङः षद पद्यर्थे।शुंध शौचकर्मणि।छद अपवारणे।जुष परितर्कणे।परितर्पण इत्यन्ये।धूञ्
कंपने।प्रीञ् तर्पणे।श्रंथ ग्रंथ संदर्भे।आप्लृ लंभने।तनु श्रद्धोपकरणयोः।उपसर्गाच्च दैर्घ्ये।वन श्रद्धोपहन
नयोः।वद संदेशवचने।स्वरितेत्।अनुदात्त इत्येके।वच परिभाषणे।मान पूजायां।भू प्राप्तावात्मने
पदी।गर्ह विनिंदने।मार्ग अन्वेषणे।कठि शोके।मृजू शौचालंकारयोः।मृष तितिक्षायां।धृष प्रस १३

निष्क उपसेवायां।इषु धरग्ध धारणे।चरण वरण गतौ।चुरण चौर्ये।तुरण त्वरायां।भुरण धारण पोषण
योः।गद्गद वाक्स्खलने।एला केला खेला विलासे।इल इत्यन्ये।लेखा स्खलने च।अर्द्ध तौ वा।लिट अल्प कुत्स
नयोः।लाट जीवने।हृणीङ् रोषणे लज्जायां च।महीङ् पूजायां।रेखा श्लाघासादनयोः।द्रवस परिताप
परिचरणयोः।तिरस् अंतर्द्धौ।अगद नीरोगत्वे।उरस् बलार्थः।तरण गतौ।पयस् प्रसृतौ।संभूयस्
प्रभूतभावे।अंबर संबर संभरणे।आकृतिगणोयं।। ।।इति कंड्वादयः।।इति धातुपाठः।।संवत
त् सं० १८४१ वर्षे मार्गशीर्ष शुदि चतुर्थ रवौ लिखितं काश्यां द्विवेदि शांमसुंदरांम तल्लेन।[redacted]
अस्तु नमस्तु।शिवं।। श्री।। छ ।। छ।।श्रीः।।श्रीः।। छ ।।श्रीः।। छ।